# Shri Tripura Pratarbhajanam

# श्रीत्रिपुराप्रातर्भजनम्

## Document Information

Text title : Shri Tripura Pratarbhajanam 08 16

File name : tripurAprAtarbhajanam.itx

Category : devii, devI, suprabhAta, dashamahAvidyA

Location : doc_devii

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 08-16

Latest update : August 15, 2021

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 15, 2021

*sanskritdocuments.org*

# श्रीत्रिपुराप्रातर्भजनम्

प्रातःस्मरामि भजतामभयङ्करं तं
पादारविन्दमतिसुन्दरमम्बिकायाः ।
दुस्स्वप्नदोषहरणं करणं सुखानां
सुस्वप्नबोधमखिलौघनिबर्हणञ्च ॥ १॥

प्रातःस्मरामि सकलार्थवरप्रदानं
पादारविन्दमतिकोमलमम्बिकायाः ।
इन्द्रादिदिक्पतिविरिञ्चमुकुन्दमौलि-
रत्नांशुसूर्यकिरणानुविकासितं तत् ॥ २॥

प्रातःस्मरामि सुरधेनुपयोधराय-
मानं चतुष्टयकराम्बुजमम्बिकायाः ।
पुण्ड्रेक्षुचापमदनास्त्रभुजङ्गपाश-
रत्नाङ्कुशौकनक(शोज्ज्वलित) कङ्कणभूषणाढ्यम् ॥ ३॥

प्रातःस्मरामि पृथिवीजलवह्निवायु-
व्योमादिरूपमखिलं च पदारविन्दम् ।
यद्रेणुमाप्य कमलासनमाधवेशाः
कुर्वन्ति विश्वहरणस्थितिसर्गकेलिम् ॥ ४॥

प्रातःस्मरामि मुखपङ्कजमन्दहासं
मन्दस्मिताधरतिरस्कृतचन्द्रबिम्बम् ।
याद्दश्यकेन फणिताखिलवेदशास्त्र-
त (??) कचक्ररथमङ्गजयोधनस्य (?) ॥ ५॥

यः श्लोकपञ्चकमिदं पठति प्रभाते
धर्मादिदं परहितं कथितं हरेण ।
तस्मै ददाति पदवीमणिमादिरूपां
जप्ता (तृप्ता) तपोभिरचलां त्रिपुरा भवानी ॥ ६॥

इति श्रीत्रिपुराप्रातर्भजनं सम्पूर्णम् ।

Proofread by Rajesh Thyagarajan

*Shri Tripura Pratarbhajanam*

pdf was typeset on August 15, 2021

Please send corrections to *sanskrit@cheerful.com*